लोकैरध्युषितं लोकं श्यामलाङ्गैश्च लोमशैः ।
गणौ कथयतं कोऽसौ को लोकः पुण्यतः स्मृतः ॥
गणावूचतुः ।
गुह्यकानामयं लोकस्त्वेते वै गुह्यकाः स्मृताः ।
न्यायेनोपार्ज्य वित्तानि गूहयन्ति च ये भुवि ॥
स्वमार्गगा धनाढ्याश्च शूद्रप्रायाः कुटुम्बिनः ।
संविभज्य च भोक्तारः क्रोधासूयाविवर्ज्जिताः ॥
न तिथिं नैव वारञ्च संक्रान्त्यादि न पर्व्व च ।
नाधर्म्मञ्च न धर्म्मञ्च विदन्त्येते सदासुखाः ॥
एकमेव हि जानन्ति कुलपूज्यो हि यो द्विजः ।
तस्मै गाः संप्रयच्छन्ति मन्यन्ते तद्वचः स्फुटम् ॥
सन्दद्विभाज्यो ह्यत्रापि तेन पुण्येन गुह्यकाः ।
भुञ्जते स्वर्गसौख्यानि देवत्वमकुतोभयाः ॥”
इति काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादः ॥ (पक्वान्नविशेषः । तस्य पाकप्रकारो यथा, शब्दार्थचिन्तामणिधृतपाकशास्त्रे ।
“समितां सर्पिषा भृष्टां सितादुग्धादिसम्भृताम् ।
एला लवङ्गकर्पूरमरीचपरिवासिताम् ॥
निष्प्राण्यसमितालम्बपुटे वेष्ट्य घृते पचेत् ।
ततः खण्डे न्यसेत् पक्वे गुह्यकोऽयमुदाहृतः ॥”
अस्य गुणास्तच्चैव । यथा,—
“गुह्यको बृंहणो हृद्यो वृष्यः पित्तानिलापहः ।
मधुरोऽतिगुरुः पाके किञ्चित् सन्धानकृत् सरः ॥”)
गुह्यकेश्वरः, पुं, (गुह्यकानामीश्वरः प्रभुरधिपतिरित्यर्थः ।) कुवेरः । इत्यमरः । १ । १ । ७१ ॥ (यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे । ५ । ६१ ।
“यः पुमान् स कुवेरश्च धनेशो गुह्यकेश्वरः ॥”)
गुह्यगुरुः, पुं, (गुह्यः गोप्यः हृदयाभ्यन्तर्वर्त्ती अन्तर्यामिस्वरूपो गुरुः ।) शिवः । इति त्रिकाण्डशेषः ॥
गुह्यदीपकः, पुं, (गुह्येन गुह्यस्थज्योतिषा दीपयति प्रकाशयतीति । स्वयं गुह्यः सन् दीपयतीत्येके । दीप् + ण्वुल् ।) खद्योतः । इति शब्दचन्द्रिका ॥
गुह्यनिष्यन्दः, पुं, (गुह्यात् गुह्यदेशात् उपस्थच्छिद्रादित्यर्थः निष्यन्दते निर्गम्यते इति ।) मूत्रम् । इति राजनिर्घण्टः ॥
गुह्यपुष्पः, पुं, (गुह्यानि अदृश्यानि पुष्पाणि यस्य इति ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥
गुह्यवीजः, पुं, (गुह्यमदृश्यं वीजमस्य ।) भूतृणम् । इति राजनिर्घण्टः ॥
गुह्यभाषितं, क्ली, (गुह्यं रहस्यं भाषितम् ।) मन्त्रः । इति जटाधरः ॥ गुप्तवाक्यञ्च ॥
गू, औ शि विट्सृजौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) औ, गूनः । शि, गुवति अगुवीत् । विट्सृजिर्हदनम् । इति दुर्गादासः ॥
गूः, पुं, गुः । विष्ठा । गूधातोः कर्म्मणि क्विप्प्रत्ययेन निष्पन्नः ॥ (गच्छत्यपानेन देहात् । गम् + कूः । मलोप इत्येके ॥)
गूढं, क्ली, (गुह + भावे क्तः ।) रहः । गुह्यम् । इति मेदिनी । ढे । १ ॥
गूढः, त्रि, (गुह + कर्म्मणि क्तः ।) संवृतः । गुप्तः । इत्यमरमेदिनीकरौ ॥ (यथा, पञ्चदश्याम् ।१।३८।
“शक्तिरस्त्यैश्वरी काचित् सर्व्ववस्तुनियामिका ।
आनन्दमयमारभ्य गूढा सर्व्वेषु वस्तुषु ॥”)
गूढजः, पुं, (गूढात् गुप्तभावादित्यर्थः गूढे गुप्तस्थाने वा जायते इति । गूढः सन् जायते इत्येके । गूढ + जन् + डः ।) गूढोत्पन्नपुत्रः । इति मिताक्षरा ॥ (यथा, याज्ञवल्क्यः । २ । १३२ ।
“गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतो मतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥”)
गूढनीडः, पुं, (गूढः गोपनस्थलस्थः गूढे गुप्तस्थाने वा नीडः कुलायोऽस्य ।) खञ्जनपक्षी । इति शब्दमाला ॥
गूढपत्रः, पुं, (गूढः समाच्छन्नः पत्रेण योऽसौ । गूढं पत्रमस्येति केचित् ।) करीरवृक्षः । अङ्कोठवृक्षः । इति राजनिर्घण्टः ॥
गूढपथः, पुं, (गूढः पन्था गतिर्यस्य समासनिष्पन्नत्वादच् ।) अन्तःकरणम् । इति हेमचन्द्रः ।६।५॥ गुप्तपथश्च ॥
गूढपात्, [द्] पुं, (गूढं पादयति । पद गतौ + णिजन्तात् क्विप् । यद्वा गूढाः पादा अस्य पृषोदरादित्वादलोपे साधुः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥
गूढपादः, पुं, (गूढाः संवृताः पादा अस्य ।) सर्पः । इति शब्दरत्नावली ॥
(“पादानामपि विज्ञेये द्वे शते द्वे च विंशती ।”
इत्यागमः ।
आच्छादितपादे त्रि । यथा, महाभारते ।
“सन्तोषामृततृप्तस्य विश्वैश्वर्य्यं करस्थितम् ।
उपानद्गूढपादस्य सर्व्वा चर्म्मावृतेव भूः ॥”)
गूढपुरुषः, पुं (गूढः गुप्तः पुरुषः छद्मवेशी राजप्रेरितो जनः इत्यर्थः ।) चरः । इत्यमरः ।२।८।१३॥
गूढपुष्पकः, पुं, (गूढः समावृत इव पुष्पैर्योऽसौ इवार्थे कन् । गूढानि संवृतानि पुष्पाण्यस्य इत्येके ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥
गूढफलः, पुं, (गूढः संवृतप्रायः फलेनासौ । गूढं यथा स्यात् तथा फलतीत्येके ।) वदरः । इति राजनिर्घण्टः ॥
गूढमार्गः, पुं, (गूढः प्रच्छन्नः मार्गः ।) भुवोऽन्तरमार्गः । सुड़ङ्ग इति भाषा ॥ तत्पर्य्यायः । सुरङ्गा २ सन्धिला ३ । इति हेमचन्द्रः । ४।५१॥
गूढमैथुनः, पुं, (गूढं अन्यैरदृश्यं मैथुनं यस्य ।) काकः । इति त्रिकाण्डशेषः ॥
गूढवर्च्चाः, [स्] पुं, (गूढं वर्च्चोऽस्य ।) भेकः । इति त्रिकाण्डशेषः ॥
गूढवल्लिका, स्त्री, (गूढा वल्लिका वल्ली यस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥
गूढसाक्षी, [न्] त्रि, (गूढः प्रच्छन्नः सन् यः अर्थिना प्रत्यर्थिवाक्यं श्रावितः तादृशः साक्षी ।) योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः सः । फरियादी गोपने राखिया आसामीर कथा याहाके शुनाइयाछे सेइ साक्षी इति भाषा ॥ तथा च नारदः ।
“अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।
यः श्राव्यते तदा गूढो गूढसाक्षी स उच्यते ॥”
इति व्यवहारतत्त्वम् ॥
गूढाङ्गः, पुं, (गूढानि अङ्गानि यस्य इच्छामात्रेणैवाङ्गानि अन्तःप्रवेशयति इति तात्पर्य्यार्थः ।) कच्छपः । इति राजनिर्घण्टः ॥
गूढाङ्घ्रिः, पुं, (गूढः संवृतः शल्केनावृतोऽङ्घ्रिश्चरणोऽस्य ।) सर्पः । इति राजनिर्घण्टः ॥
गूढोत्पन्नः, पुं, (गूढं अन्यैरविज्ञातं यथा स्यात् तथा उत्पन्नो जातः ।) द्वादशविधपुत्रमध्ये पुत्रविशेषः । यथा, मनुः । ९ । १७० ।
“उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥”
अस्यार्थः । “यस्य गृहेऽवस्थितायां भार्य्यायां पुत्र उत्पद्यते सजातीयोऽयं भवतीति ज्ञानेऽपि कस्मात् पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स गृहे अप्रकाशमुत्पन्नस्तस्य पुत्रः स्यात् यदीयायां भार्य्यायां जातः ।” इति कुल्लूकभट्टः ॥ (अयं हि बन्धुदायहारी । यथाह मनुः । ९।१५९ ।
“औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥”)
गूथं, क्ली पुं, (गवते शब्दायते गुवति पुरीषमुत्सृजतीति वा । गुङ शब्दे गुशि विष्ठोत्सर्गे वा + “तिथपृष्ठ गूथ यूथ प्रोथाः ।” उणां । २ । १२ । इति थक् दीर्घश्च ।) विष्ठा । इत्यमरः । २ । ६ । ६८ ॥ गु इति भाषा । (शरीरादिमलेऽपि कर्णगूथादिशब्ददर्शनात् ॥)
गूथलक्तः, पुं, (गूथे विष्ठायां रक्तः अनुरक्त आसक्त इत्यर्थः । ततो रस्य लत्वम् ।) पक्षिविशेषः । गुये शालिक् इति भाषा । तत्पर्य्यायः । शरमल्लः २ क्षुद्रचूड़ः ३ सालिकः ४ । इति शब्दचन्द्रिका ॥
गूनः, त्रि, (गूयते पुरीषमुत्सृज्यते स्म इति । गु शि विष्ठोत्सर्गे + क्तः । “दुग्वोदीर्घश्चेति ।” नत्वं दीर्घश्च ।) कृतपुरीषोत्सर्गः । तत्पर्य्यायः । हनः २ । इत्यमरः । ३ । १ । ९६ ॥
गूर, ङ क उद्यमे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) दीर्घी । ङ के, भस्मेषु नो गूरयते महोरगः । इति दुर्गादासः ॥ (तथा च कविरहस्ये । ५१ ।
“भस्मेषु नोद्गूरयतेऽक्षमाहवे-
ऽप्युक्तोऽपि यो नोद्गुरते स्वधर्म्मवित् ॥”)
गूर, ई य ङ वधे । गत्याम् । इति कविकल्पद्रुमः । (दिवां-आत्मं-सकं-सेट् ।) दीर्घी । तथा च ।
“दीपिपूरिजनिगारिधूरयः
काशिवाशिपदिसूरितूरयः ।
घूरिजूरिखिदिविद्यतिः क्लिशि-
र्चूरिरुध्यतिमनो दिवादिषु ॥
इति रथोद्धतायां चण्डेश्वरः ।” इति दुर्गादासः ॥
गूरणं, क्ली, (गूर क ङ उद्यमे + भावे ल्युट् ।) उद्यमः । इत्यमरटीकायां रायमुकुटः ।३।८।११॥